## १.१.१७. श्रीअरविन्दः (१८७२-१९५०)

श्रीअरविन्दघोषः कश्चन भारतीयो जातीयसङ्ग्रामयोद्धा दार्शनिको योगी महर्षिः गुरुः क्रान्तिकारी कविश्च वर्तते। कलिकतायां स कृष्णधनघोष-श्यामलतयोः पुत्रत्वेन १८७२ ईशवीयसंवत्सरे अगष्टमासस्य पञ्चदशदिनाङ्के भूमिष्ठो जातः। पञ्चमे वर्षे स दार्जिलिंस्थे ल्यारोटेकनभेन्टविद्यालये पठनं प्रारभ्य वर्षद्वयात्परं सप्तवर्षे एव वयसि शिक्षानिमित्तम् 'इङ्ग्लाण्डं' गत्वा इण्डियनसिभिलसर्भिल-परीक्षाया निमित्तं केम्ब्रिज-अधीने 'किङ्गस्-कलेज'इत्यत्र पठित्वा कृतकार्यः सन्नपि अश्वचालने भागग्रहणं विना तत्र योगदानमकृत्वा भारतमागतवान्। १८९२ संवत्सरे केम्ब्रिजविश्वविद्यालयात् स 'ट्राइपस्' वृत्तिं प्राप्तवान्। १८९३ संवत्सरे स्वदेशमागतो वरोदा-महाराजस्य अधीने तस्य महाविद्यालये अध्याकरूपेण तदनु अध्यक्षरूपेण सेवामकरोत्। अत्रैव स महाराष्ट्रस्य गुप्तविप्लविनां नेतुः ठाकुरसाहेवाद् विप्लवमन्त्रेण दीक्षितः। १९०२ संवत्सरे स वांलादेशे विप्लवदलसंगठनाय भ्रातरं वारीन्द्रकुमारं प्रेषितवान्। १९०५ संवत्सरे वङ्गभङ्गं विरुध्य आन्दोलने योगदानं कृत्वा वरोदामहाविद्यालयस्याध्यक्षपदं त्यक्तवान्। १९०५ संवत्सरे आङ्ग्लभाषया प्रकाशितायाः 'वन्देमातरम्' पत्रिकायाः सम्पादनादायित्वं स्व्यकरोत्। ब्रिटिशसर्वकारविरुद्धं राजनीतौ भागं नीतवान्, लेखं लिखितवान् च। राजद्रोहमूलकलेखार्थम् आलिपुरविस्फोरणार्थञ्च अभियुक्तः स देशबन्धुना चित्तरञ्जनेन मोचितः। ब्रिटिशसर्वकारेण वन्दीकृतोऽपि स कारणाभावात् पुनः मुक्तो जातः। ततः परं स सनातनधर्मप्रचाराय जातीयदलपुनर्गठनाय च आङ्ग्लसाप्ताहिकीं 'कर्मयोगिन्' इत्येतां तथा वङ्गीयां 'धर्म' पत्रिकां समपादयत्। स्वल्पदिनाभ्यन्तरे १९२६ संवत्सरे फरासीमहिलया 'मीरा आल्फासया' (श्रीमात्रा) सह मिलित्वा पण्डिच्चेर्य्यामाश्रमं संस्थाप्य योगसाधनार्थं समाजसेवार्थञ्च कार्यमारभत। अनन्तरकाले आर्य-सन्ध्या-युगान्तरादिपत्रिकाभिः युक्तः सन् स आध्यात्मिकजीवनस्य तत्त्वसमूहं प्रत्यपादयत्।

स प्रथमो भारतीयो विद्वान् आङ्ग्लभाषया लेखनं प्रारब्धवान्। तेन रचितानां ग्रन्थानां सङ्ख्या प्रायः चत्वारिंशत्। वङ्गभाषया सप्त, आङ्ग्लभाषया त्रयस्त्रिंशद् तथा संस्कृतभाषया एको ग्रन्थश्च तेन रचिताः सन्ति। तस्य अधिकप्रचारितं महाकाव्यं भवति सावित्री। आर्षप्रतिभया विमण्डितस्य तस्य काव्यसंसारे भारतीयसभ्यतायाः संस्कृतेश्च प्रतिबिम्बनं दृश्यते। तस्य मुख्यग्रन्था

यथा-

1. The Life Divine
2. Eassays.on Gita
3. Savitri
4. Mother India
5. The Hero and the Nymph
6. Urvasie
7. Song of Myrtilla and Other Poems
8. The age of Kalidasa
9. A System of National Education
10. The Renaissance in India
11. Speeches of Aurobindo
12. श्रीअरविन्दोपनिषद्
13. तान्त्रिकसिद्धिप्रकरणम्
14. कैवल्योपनिषद्व्या
15. सप्तचतुष्टयम्
16. मन्त्रः
17. काराकाहिनी
18. धर्म ओ जातीयता
19. अरविन्देर पत्र
20. भवानीभारती

भारतीयजनजीवनस्य महान् भाष्यकारोऽयं ५.११.१९५० संवत्सरे नभेम्बरमासस्य पञ्चमदिवसे, ७८ वर्षे वयसि पण्डिचेर्याश्रमे इहलोकमत्यजत्।

भवानीभारती-मातृभूमेः स्वाधीनतासङ्ग्रामे स्वल्पकालं यावदंशग्रहणं कृत्वापि श्रीअरविन्दः स्वल्पकालाभ्यन्तरे भारतीयजनमानसे प्रगाढदेशप्रेम जागरितवान्। वन्देमातरमिति पत्रिकामाध्यमेन स्वलेखान् प्रकाश्य राष्ट्रभक्तिं प्रादर्शयत्। तेन राष्ट्रशक्तेरभ्युदयाय "भवानीमन्दिरम् " इति अभिनवयोजनायाः परिकल्पना कृता। मातृभूमेः रक्षणार्थं प्रत्येकं भारतीयः स्वहृदये मातृशक्तिमावाहयेत्। मात्रुपासनया राष्ट्रोत्थानमिति अस्या योजनाया मूलमन्त्र आसीत्। विविधवैदेशिकभाषानिपुणः अरविन्दो वरोदायां संस्कृत-वङ्गादिसाहित्ये .निपुण आसीत्। अस्मिन्नेव समये कदाचित् तस्य हृदयानुभवैः परिपूतमेकं दिव्यं काव्यमजायत। १९०५ ईसवीयसंवत्सरं यावदस्य सर्जनं समाप्तमासीत्। काव्यमिदं संस्कृतभाषाया अपूर्वजीवनीशक्तेः परिचायकमस्ति। यदा रवीन्द्रनाथः राष्ट्रियगीतं लिखन् आसीत्, तथा वङ्किमचन्द्रस्य वन्देमातरं भारतवर्षे जोगुञ्जते स्म, तदा एक आर्षप्रतिभावान् कविरस्य काव्यस्य निर्माणं प्रारब्धवान्। अस्य समकक्षकाव्यानि समकालिक्यां कस्यामपि भाषायां द्वित्राणि भवेयुः, ततोऽधिकं न। १९०८ संवत्सरे कलिकातारक्षिभिरस्य एकमात्रा प्रतिकृतिः वशीकृतेति, कविरवसरमेव न प्राप्तवान् अस्य संस्काराय, संशोधनाय वा। अतः यद्यपि भवानीभारत्यां

क्वचिद् विलसन्त्येव व्याकरणगताशुद्धयः, तथापि अभिव्यक्तेरप्रतिहता गतिस्तथा परिस्फुटपदावली आर्षकाव्यस्य प्रत्ययं सृजतः। बहुवर्षेभ्यः परं १९८५ संवत्सरे पण्डिचेरी-आश्रमेण तन्मोचयित्वा १९८६ संवत्सरे शीर्षकरहितस्यास्य काव्यस्य "भवानीभारती"ति शीर्षकेण प्रथमप्रकाशनं कृतम्। अत्र उपजातिच्छन्दोबद्धाः ९९ श्लोका देशभक्तिभावसम्भृताः सन्ति।

प्रस्तुतकाव्ये कविः भारतमातरं भवानीरूपेण कल्पयति। बडोदाकारागारे कवेः स्वप्नावस्थायां भारतमाता भवानीरूपेण प्रादुर्भूता सती भरतपुत्रान् आह्वयति। काव्यस्यास्य कथावस्तु विविधभावैः सुसमृद्धमस्ति। रसपरिपाकदृष्ट्यापि काव्यमिदमत्युत्कृष्टं प्रतिभाति। कवेरसाधारणप्रतिभादीप्त्या सामान्यः शब्दो वा अर्थो वा सौन्दर्यमहिम्ना महिमान्वितो भवति। सत्यमुक्तं शिवलीलामृतकारेण नीलकण्ठदीक्षितेन-

यानेव शब्दान् वयमुच्चरामो यानेव चार्थान् वयमुल्लिखामः।
तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ते कवयो जगन्ति॥

निद्रितावस्थायां स पश्यति, स्वयं भारतभाता तस्य समक्षमाविर्भूता। क्षुत्पिपासाकुलिता दरिद्रा क्रूरा करालदंष्ट्रा भयङ्करी च भारतजननी ग्रीवायां नरास्थिमालां, कटौ नृमुण्डमेखलां, पृष्ठे असुराणां कशाघातान् धारयन्ती घोरघर्घरशब्दैः गर्जति। प्रत्यक्षदृष्टामिव विकरालमूर्त्तिमित्थं वर्णयति कविः-

सौम्यं वपुस्ते हिमवर्णमार्यं सौम्यं भवान्या वदनं ह्युदारम्।
शुक्लाम्बरा यौवनशुभ्रकान्तिं स्नेहार्द्रनेत्रां बलिनीं नमामि॥४॥
नरास्थिमालां नृकपालकाञ्चीं वृकोदराक्षीं क्षुधितां दरिद्राम्।
पृष्ठे व्रणाङ्कामसुरप्रतोदैः सिंहीं नदन्तीमिव हन्तुकामान्॥५॥
क्रूरैः क्षुधार्तैर्नयनैर्ज्वलद्भिर्विद्योतयन्तीं भुवनानि विश्वा।
हुङ्काररूपेण कटुस्वरेण विदारयन्तीं हृदयं सुराणाम्॥६॥
आपूर्य विश्वं पशुवद्भिरावैर्लेलिह्यमानाञ्च हनू कराले।
क्रुराञ्च नग्नां तमसीव चक्षुर्हिंस्रस्य जन्तोर्जननीं ददर्श॥७॥
आलोलकेशैः शिरान्निगृह्य करालदंष्ट्रैश्च विसार्य सिन्धून्।
श्वासेन दुद्राव नभो विदीर्णं न्यासेन पादस्य च भूश्चकम्पे॥८॥

शय्यां त्यक्त्वा आर्षकविः मातरं हृदि पूजयित्वा आविर्भावकारणं पृच्छति। तदा कविं पुत्रमिषेण भारतमाता सर्वान् सम्बोध्य भारतस्यातीतगौरवं प्रख्याप्य

साम्मतिकीं दुरवस्थां वर्णयति-

मातास्मि भोः पुत्रक भारतानां सनातनानां त्रिदशप्रियाणाम्।
शक्तो न यान् पुत्र विधिर्विपक्षः कालोऽपि नो नाशयितुं यमो वा॥ १२॥
दीनाः क एते घृणिनो दरिद्राः शान्तिं जघन्यां गणिकामिवान्धाः।
भजन्ति भोः कापुरुषा विमूढा आलिङ्ग्य ये मोदथ मृत्युमेव॥ १५॥

एषा भारतमाता तान् भारतवासिन आक्षिपति, ये ब्राह्मणब्रुवा म्लेच्छानामाङ्ग्लानां चरणं चुम्बन्ति-

म्लेच्छस्य पूतश्चरणामृतेन गर्वं द्विजोऽस्मीति करोति कोऽयम्॥ १७॥'

प्रत्येकं देशवासिनं जागरयितुं स्फूर्तिमन्तं विधातुं च कविः कांक्षते, स कस्यापि प्रान्तस्य भवतु नाम-

भो भो अवन्त्या मगधाश्च बङ्गा अङ्गाः कलिङ्गाः कुरुसिन्धवश्च।
भो दाक्षिणात्याः श्रृणुतान्ध्रचोला वसन्ति ये पञ्चनदेषु शूराः॥ २३॥
ये के त्रिमूर्त्तिं भजथैकमीशं ये चैकमूर्त्तिं यवना मदीयाः।
माताह्वये वस्तनयान् हि सर्वान् निद्रां विमुञ्चध्वमये श्रृणुध्वम्॥ २४॥
उत्तिष्ठ भो जागृहि सर्जयाग्नीन् साक्षादधि तेजोऽसि परस्य शौरेः।
वक्षःस्थितेनैव सनातनेन शत्रून् हुताशेन दहन् नटस्व॥ १८॥

इमानि वाक्यानि श्रुत्वा अन्धकारे तां भयङ्करीं कालीं विलोक्य कविचित्तमनृत्यत्। भोगं गृहञ्च त्यक्त्वा स बहिरागतः।

इमानि वाक्यानि निशम्य रात्रौ तेजश्च भीमं तिमिरे विलोक्य।
चित्तं ननर्ताशु विहाय सद्म भोगान् विनिर्धूय च निर्जगाम॥ ३२॥

बहिर्गत्वा स घनान्धकारपीडितमार्यखण्डं शत्रुपीडितां भारतजननीं, पराश्रुरक्तेन स्वसन्तानं पालयन्तं मुकुटधारिणं राक्षसराजं पश्यति। तदा स्वपुत्रान् सम्बोध्य तेन युध्यति सा। तयोः घोरतरं युद्धं भवति। तदा समुदितस्तपनः स्वकिरणैः तं दानवं विनाशयति। तदा नारीरूपेण आविर्भवन्ती ज्योतिः अवतरति। तदा निर्गतदुःखानां सर्वलोकवासिनां स्तवनेन काव्यं समाप्तं भवति। लघुकाव्यमिदमपि मातृभूमेः महत्त्ववर्णनेन तस्याः सेवायां प्रवर्तनेन सर्वतोभावेन वैशिष्ट्यमादधाति।

श्रीअरविन्दस्य काव्यस्यास्य समीक्षावसरे डॉ.सम्पदानन्दमिश्रो वदति- “श्रीअरविन्दस्य मतेन भारतभूमिरियं न कश्चिद् भूखण्डविशेषो न वा भाषाया अलङ्कारो न वा मनसः कल्पना। सा खलु महाशक्तिः। यथा भवानी महिषामर्दिनी

बलपुञ्जरूपेण संहतानामैक्यग्रथितानां कोटिशो देवानां शक्तेराविर्भूता तथैव राष्ट्रस्य अङ्गभूतानां कोटिशः प्रजानां समवायेन सा निर्मिता। यां वयं भारतवर्षं भवानीभारतीं वा कथयामः सा हि कोटिशः प्रजानां शक्तेः जीवत्समवायः।" तस्या एव मातुः स्तुतिं कुर्वन् श्रीअरविन्दः अस्मिन् काव्ये लिखति-

अनन्तशक्त्यृद्धिमशेषमूर्त्तिं को वक्ष्यतीमां तव सर्वशक्ते।
तेजस्त्वमेतद्बलिनां बलञ्च त्वं कोमलानामपि कोमलासि॥८८॥
काली त्वमेवासि सुनिष्ठुरासि त्वमन्नपूर्णा सदया च सौम्या।
नमामि रौद्रां भुवनान्तकर्त्रि प्रेमाकुलामेव नमामि राधे॥८७॥

अन्ततो भारतमातरं स्तुवन् कविर्वदति-

प्रीतिर्दया धैर्यमदम्यशौर्यं श्रद्धा तितिक्षा विविधाश्च विद्याः।
अनन्तरूपे त्वमसि प्रसीद चिरं वसार्ये हृदि भारतानाम्॥९८॥
सिन्धून् हिमाद्रिं च सुसौम्यभासा प्रकाशयन्ती सुदृढप्रतिष्ठा।
तिष्ठ प्रसन्ना चिरमार्यभूमौ महाप्रतापे जगतो हिताय॥९९॥

काव्येऽस्मिन् कविप्रतिभया परिपोषिता रसाः सहृदयानां हृदयोल्लासं वितन्वन्ति।

भयानको यथा- नरास्थिमालां नृकपालकाञ्चीं वृकोदराक्षीं क्षुधितां दरिद्राम्।
पृष्ठे व्रणाङ्कामसुरप्रतोदैः सिंहीं नदन्तीमिव हन्तुकामान्॥५॥

वीरः- वैदेशिकानां हस्तान्मुक्तिकांक्षिणां कृते आह्वाने वयमाविष्कुर्मो वीररसम्-

शूराः प्रगल्भाश्च हि शात्रवाणां स्पर्धालवं सोढुममर्षणास्ते।
पूजां जनन्या रिपुभिः समाप्य रेजू रणान्ते रुधिराक्तदेहाः॥१४॥
अस्त्येव लोहं निशितश्च खड्गः क्रूराः शतघ्नी नदतीह मत्ता।
कथं निरस्त्रोऽसि मृतोऽसि शेषे रक्ष स्वजातिं परहा भवार्यः॥२०॥
कं बिभ्यतार्या रुधिरस्य सिन्धौ निमज्जितास्मिन् भवतार्यसत्त्वाः।
त्रिशूलि भोः पश्यत तत्र पारे ज्योतिर्ह्यदेतीदमभिन्नतेजः॥२९॥
सनातनान्याह्वय भारतानां कुलानि युद्धाय जयोऽस्तु मा भैः।
भो जागृतास्ति क्व धनुः क्व खड्ग उत्तिष्ठतोत्तिष्ठत सुप्तसिंहाः॥३३॥

वीभत्सः- मातुर्भवान्या विकरालरूपवर्णने कविः बीभत्सरसस्य सन्धानं करोति-

देहि क्रतून् देहि पिपासुरस्मि जानीहि दृष्ट्वा भज शक्तिमाद्याम्।
शिरांसि राज्ञां महतां तनूश्च भोक्तुं नदन्ती चरतीह काली॥२६॥

आजौ यदा नृत्यसि चण्डि घोरे शृगालघुष्टे दधनी त्रिशूलम्।
स्पर्शेन कम्पन्त इवायुधस्य महान्ति तारानियुतानि नाके॥५६॥
खुरैः सुनीष्पिष्टमिदं सुरभ्या घोरं किमेवापि सुकृष्णवर्णम्।
मांसस्य पिण्डं ह्यवनौ निरीक्षे शेषोऽयमस्त्येव तवाहितानाम्॥६७॥

रौद्ररसः- भवान्या रौद्रस्वरूपचित्रणे कविः रौद्ररसं परिपुष्णाति।
ज्वालाकराला धरणी बभूव क्रोधैर्ज्वलद्भिर्गगनञ्च तूर्णैः।
हेषारवैर्दुन्दुभिः घोरनादैस्त्रस्ता धराभूदनुजस्य युद्धे॥ ४५॥
रक्ताक्तमेघा नभसीव तेपुः पपात चोर्व्यां रुधिरोगवृष्टिः।
रक्तोदधौ रेजुरथाद्रिसङ्घा वसुन्धरा रक्तमयी बभासे॥ ४६॥

करुणरसः- पराधीन-भारतभूमेः दुर्दशावर्णनेन परिपुष्टोऽत्र करुणरसः।
सान्द्रं तमिस्त्रावृतमार्तमन्धं ददर्श तद्भारतमार्यखण्डम्।
गूढा रजन्यामरिभिर्विनष्टा माता भृशं क्रन्दति भारतानाम्॥३३॥
स भ्रामयामास दृशं रजन्यां भ्रातृन् स लप्तस्तिमिरे विचिन्वन्।
कङ्कालसाराणि ददर्श तानि शवानि तेषां करुणानि भूमौ॥३४॥

अद्भुतरसः-द्विकोटिभास्वद्वरसूर्यभासं ज्योतिस्तदा सौम्यमरातिनाशि।
नारीशरीरं रमणीयकान्ति दूरादुदीच्यामुदियाय शुभ्रम्॥५०॥
समाधिधीरा हिमभूतधेया युगान्यनेकानि हिमाद्रिकूटे।
यो योगिनो भारतगोप्तुरूपास्ते तुष्टुवुस्तां मुदिता महान्तः॥५२॥
तां ह्लादितां दीप्तजगत्सु देवास्तामन्तरीक्षे मधुरं वयांसि।
जगुमनुष्याः प्रणिपत्य चोर्व्यां विश्वं विनष्टाधि यदाविवेश॥५६॥

एवमेव रसान् परिपोष्य कविः प्रमुखं भक्ति/देशभक्तिरसं दीपयति। तदर्थं भवान्याः सौम्यस्वरूपं स्तौति। यथा-
सौम्यं वपुस्ते हिमवर्णमार्यं सौम्यं भवान्या वदनं ह्युदारम्।
शुक्लाम्बरा यौवनशुभ्रकान्तिं स्नेहार्द्रनेत्रां बलिनीं नमामि॥४॥

एवं काव्यमिदं कवेर्महर्षेररविन्दस्य हृदये निहितस्य देशप्रेम्णः सफलाभिव्यक्तिरूपं वर्तते। अत्र उपमा-उत्प्रेक्षा-रूपक-अतिशयोक्त्याद्यलङ्काराणां सहजो विनियोगो लक्ष्यते।

अन्ते डा.श्वेताप्रजापतेः कथनस्य सत्यतानुभूयते- “समग्रे भवानीभारतीकाव्ये क्रान्तिकारिणः कविहृदये समुम्पन्नानि क्रान्तिकारिस्पन्दनानि

यथार्थतया निरूपतानि सन्ति। प्रथमतः स्वप्ने मातुः भवान्याः रौद्रस्वरूपस्य दृश्यं तथा अन्तिमे सौम्यस्वरूपस्य वर्णनेन कविः मातृभूमेः तदानीन्तनीं दुर्दशां तथा तदनन्तरं स्वर्णिमभविष्यतो वर्णनं लभ्यते। एवमेव युवजनमानसे देशभक्तिजागरणाय अत्र कविना सफलस्तथा प्रशंसनीयः प्रयासः कृतः।"[36]

सत्यमुक्तं प्रो.राधावल्लभेन- "काव्यमिदं स्वतन्त्रतासङ्ग्रामस्य महायज्ञे सार्थकाहुतिरूपमासीत्। ...भवानीभारती भवति राष्ट्रजागरणस्य गीता, एकस्य क्रान्तकारिणः शङ्खनादः, ओजस्वितायास्तथा शक्तेश्च सन्धानम्, भारतराष्ट्रस्य भवितव्यस्य स्वप्नस्तथा देशस्य अखण्डताया आह्वानमपि।"[37] सत्यमुक्तं केनापि-

अरविन्दप्रणीतमिदं शतकं परिपीडितभारतमातृरवम्।
तमसावृतचेतसि वज्रसमं नवजागरणाय प्रचोदकम्॥[38]॥

## १.१.१८. स्वामी विरजानन्दः (१८७३-१९५१)

कालिकृष्णवसुः (स्वामी विरजानन्दः) हिन्दुसंस्कारान्दोलनस्य सक्रियः सदस्य आसीत्। स १८७३ संवत्सरे जुनमासस्य दशमतिथौ त्रैलोक्यनाथवसु-निषादकलिदेवी इत्यनयोः पुत्ररूपेण जातः। रामकृष्णस्य साक्षाच्छिष्येभ्यः परमेष एव प्रथमो यः प्रप्रथमतया रामकृष्णमठस्य परम्परया प्राव्रजत्। १८९७ संवत्सरे एष स्वामिना विवेकानन्देन सन्न्यासधर्मेण दीक्षितः।

स्वामिना स्वरूपानन्देन सह मिलित्वा स्वामी विरजानन्दः 'प्रबुद्धभारत' इति मासिकपत्रिकायाः प्रचारार्थं कार्यं कृतवान्। विवेकानन्दस्य रचनानां तथा वाणीनां प्रकाशने अप्येष सहयोगं कृतवान्। ततः १९०६ संवत्सरे स्वामिनो विवेकानन्दस्य जीवनचरितात्मकं "प्राच्य पाश्चात्य" ग्रन्थं सङ्कलय्य प्रकाशितवान्। १९१३ ईसवीयसंवत्सरे एष मायावत्याम् अद्वैताश्रमे अध्यक्षरूपेण नियोजितः। १९२४ संवत्सरे एष साधारणसम्पादकोऽभवत्, तदनु १९३८ संवत्सरे एष रामकृष्णमिशनस्य षष्ठोऽध्यक्षः सञ्जातः। रामकृष्णमिशनस्य प्रमुखसंस्थाद्वयस्य विद्यामन्दिरस्य तथा शारदापीठस्य च संवलसंसाधनसंयोजने अस्य अवदानमविस्मरणीयमेव। १९५१ संवत्सरे मे मासस्य १० दिनाङ्के अयं मरदेहं त्यक्तवान्। स्वामिनो विरजानन्दस्य मुख्यग्रन्थाः सन्ति-

[36]मूलहिन्दीलेखादनूदितं ग्रन्थकारेण, पृ.७४-८०, दृक्-१७।
[37]मूलहिन्दीलेखादनूदितं ग्रन्थकारेण, पृ.१६-७, सं.सा.बी.श.।
[38](surasa.net)